# प्रथमः पाठः । आद्यकृषकः पृथुवैन्यः ।

ऋग्वेदात् एषा कथा उद्धृता (ऋ.१०.९३.१४) । वेनभूपतेः पुत्रः वैन्यः एव पृथुवैन्यः इति नाम्ना ज्ञातः । सः प्रजाहितदक्षः आदर्शः सम्राट् इति स्मृतः। भारतदेशे पृथुना एव कृषिकार्यं प्रारब्धं, संशोधितं, विकासं प्रति नीतं च। स एव कृषिविद्यायाः जनकः इति मतः। अत एव सः प्रथमः कृषकः। धरित्र्याः 'पृथिवी' इति नामाभिधानं पृथोः कार्यस्य स्मारकम्' इति मन्यते बुधैः।

- भारतदेशे कृषिक्षेत्रस्य वैशिष्ट्यानि कानि ?
- कृषिप्रक्रियाविषये कथयत।



भूपालः पृथुवैन्यः नाम धरायां प्रथमः अभिषिक्तः सम्राट् । प्रयागक्षेत्रे पृथुनृपस्य राजधानी आसीत्। राज्याभिषेकसमये चारणाः पृथुनृपस्य स्तुतिं गातुमुत्सुकाः। तदा पृथुः आज्ञापयत्, ''तिष्ठन्तु चारणाः ! यावत् मम सद्गुणाः न प्रकटीभवन्ति तावदहं न स्तोतव्यः। स्तवनं तु ईश्वरस्यैव भवेत्।'' स्तुतिगायकाः पृथुनृपस्य एतादृशीं निःस्पृहतां ज्ञात्वा प्रसन्नाः अभवन्।

एकदा पृथुराजः स्वराज्ये भ्रमणम् अकरोत् । भ्रमणसमये तेन दृष्टं यत् प्रजाः अतीव कृशाः अशक्ताश्च । ताः प्रजाः पशुवज्जीवन्ति । निकृष्टान्नं खादन्ति । तद् दृष्ट्वा राजा चिन्ताकुलः जातः । तदा पुरोहितोऽवदत्, ''हे राजन्, धनधान्यादि सर्वं वस्तुजातं वस्तुतः वसुन्धरायाः उदर एव वर्तते । तत्प्राप्तुं यतस्व ।''



तदा पृथुभूपेन तदर्थं धनुः सज्जीकृतम्। तदा भूमिः स्त्रीरूपं धृत्वा तस्य पुरतः प्रकटिता अभवत् अवदत् च, ''हे राजेन्द्र! तव पिता दुःशासकः वेनराजः राजधर्मस्य पालनं नाकरोत्। तदा मया चोरलुण्ठकभयात् धनधान्यपुष्पफलानि मम उदरे निहितानि । त्वं तु प्रजाहितदक्षः नृपः । यदि त्वं प्रयत्नेन कृषिकार्यं करोषि तर्हि अहं प्रसन्ना भविष्यामि। अतः धनुः त्यज । खनित्राणि, हलान्, कुद्दालकान् लवित्राणि च हस्ते गृहीत्वा प्रजाजनैः सह कृषिकार्यं कुरु।''

भूमातुः उपदेशं मनसि निधाय पृथुवैन्यः नदीनां मार्गम् अवरुध्य कृषिकार्यार्थं जलस्य उपयोगम् अकरोत्। वृष्टिजलसञ्चयं कृत्वा जलव्यवस्थापनम् अकरोत्। भूमिम् उर्वरतमां कर्तुं प्रायतत। तदनन्तरं तस्मिन् क्षेत्रे जनाः धान्यबीजानि अवपन्। स नैकेभ्यः वृक्षेभ्यः विविधप्रकारकाणां बीजानां सङ्कलनं चयनं च परिश्रमेण

अकरोत्। अनन्तरं बीजानां संस्करणं कृत्वा वपनम् अकरोत् । पर्जन्यानन्तरं बीजेभ्य: अङ्कुरा: उद्भूता:। धान्यलाभेन सर्वे प्रजाजना: सन्तुष्टा: च अभवन्। एष: कल्याणकारी नृप: पृथिव्यां प्रशासने अग्रणी: जनसेवाव्रती च अभवत्।

### पृथुवैन्यस्य आदर्शभूतानि कार्याणि ।




## भाषाभ्यास:

**१. पूर्णवाक्येन उत्तरं लिखत ।**

अ) चारणा: किमर्थम् उत्सुका: ?
आ) भ्रमणसमये पृथुराजेन किं दृष्टम् ?
इ) वसुन्धराया: उदरे किं वर्तते ?
ई) स्त्रीरूपं धृत्वा पृथुनृपस्य पुरत: का प्रकटिता अभवत् ?
उ) पृथुवैन्य: कृषिकार्यार्थं जलस्य व्यवस्थापनं कथम् अकरोत् ?

**२. माध्यमभाषया उत्तरत ।**

अ) भूमाता पृथुवैन्यं किम् उपादिशत् ?
आ) धरित्र्या: उपदेशं मनसि निधाय पृथुवैन्य: किं किम् अकरोत् ?

**३. जालरेखाचित्रं पूरयत ।**

अ)




आ)




इ)




**४. पाठ्यांशं पठित्वा प्रवाहिजालं पूरयत ।**



**५. प्रश्ननिर्माणं कुरुत ।**

अ) प्रयागक्षेत्रे पृथुराजस्य राजधानी आसीत् । आ) प्रजा: पशुवत् जीवन्ति ।

इ) धनधान्यादि सर्वं वस्तुजातं वसुन्धराया: उदर एव वर्तते ।

ई) पर्जन्यानन्तरं बीजेभ्य: अङ्कुरा: उद्भूता: ।

**६. सूचनानुसारं कृती: कुरुत ।**

अ) पृथुवैन्यस्य नि:स्पृहतां ज्ञात्वा स्तुतिगायका: प्रसन्ना: अभवन्। (पूर्वकालवाचक-त्वान्त-अव्ययं निष्कासयत।)

आ) त्वं प्रयत्नेन कृषिकार्यं करोषि । ('त्वं' स्थाने 'भवान्' योजयत।)

इ) त्वं धनु: त्यज । ('त्वं' स्थाने 'भवान्' योजयत।)

ई) भूमातु: उपदेशं मनसि निधाय पृथुवैन्य: कृषिकार्यम् अकरोत् । ('भूमातु:' स्थाने 'भूमि' शब्दस्य योग्यं रूपं लिखत ।)

उ) प्रजाजनै: सह कृषिकार्यं कुरु । (लकारं लिखत ।)

ऊ) अहं प्रसन्ना भविष्यामि । (लृट् स्थाने लिङ् प्रयोगं कुरुत ।)

ए) भूमि: स्त्रीरूपं धृत्वा तस्य पुरत: प्रकटिता अभवत् । (पूर्वकालवाचक-त्वान्त-अव्ययं निष्कासयत।)

**७. मेलनं कुरुत ।**

| **विशेषणम्** | कृशा: | उर्वरा | आनन्दिता: | दु:शासक: | प्रजाहितदक्ष: |
|---|---|---|---|---|---|
| **विशेष्यम्** | पृथु: | वेन: | प्रजा: | भूमि: | प्रजाजना: |

**८. समानार्थकशब्दं लिखत ।** वृक्ष:, भूमि:, राजा, धनु:, नदी ।

**९. विरुद्धार्थकशब्दं लिखत ।** स्तुति: , सद्गुणा:, प्रसन्ना:, अशक्ता:, पुरत:, कृशा: ।

**१०. क: कं वदति ?**

अ) तिष्ठन्तु चारणा: । आ) तत्प्राप्तुं यतस्व । इ) तव पिता दु:शासक: । ई) अत: धनु: त्यज ।

**११. सन्धिविग्रहं कुरुत ।** अ) उदर एव आ) पशुवज्जीवन्ति इ) अशक्ताश्च ई) पुरोहितोऽवदत् ।

**१२. अमरकोषात् शब्दं प्रयुज्य वाक्यं पुनर्लिखत ।**

अ) भूमि: स्त्रीरूपं धृत्वा प्रकटिता ।

आ) भूपाल: पृथुवैन्य: नाम धराया: प्रथम: अभिषिक्त: सम्राट् ।

**क्रीडत-नन्दत ।** **अनन्त्यवाक्यरचना**

प्रथम: बाल: एकस्य शब्दस्य कथनेन कस्यचित् वाक्यस्य आरम्भं कुर्यात् । द्वितीय: बाल: प्रथमेन बालकेन उक्तं शब्दम् उच्चार्य तस्य वाक्यस्य अनुवर्तनरूपेण स्वयमपि एकं शब्दं योजयेत् । तृतीय: तृतीयम् । चतुर्थ: चतुर्थम् एवम् अग्रेऽपि । परन्तु कोऽपि वाक्यस्य समाप्तिं न कुर्यात् । य: तथा करोति स: गणात् बाह्य: भवति । उदा. - - - १. कस्मिंश्चित् - - - २. कस्मिंश्चित् ग्रामे - - - ३. कस्मिंश्चित् ग्रामे कश्चन - - - ४. कस्मिंश्चित् ग्रामे कश्चन कृपण: - - -

अत्र 'आसीत्' इति यदि उच्यते तर्हि वाक्यं समाप्तं भवति । य: तत् कथयति स: बाह्य: भवति। अत: स: केनापि प्रकारेण वाक्यम् अग्रेऽपि अनुवर्तयितुं प्रयत्नं कुर्यात् शिक्षक: किञ्चित् साहाय्यं कर्तुम् अर्हति । **- क्रीडावल्ली-पुस्तकात् ।**

6T2JYG